# VibhishanahanumatsamvAdarupavayustutih

# વિભીષણહનુમત્સંવાદરૂપવાયુસ્તુતિઃ

## Document Information

Text title : Vibhishanahanumatsamvadarupa Vayu Stuti

File name : vibhIShaNahanumatsaMvAdarUpavAyustutiH.itx

Category : vishhnu, vAdirAja, vishnu, stuti

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Jayalakshmi Jayaraman, Revathy R.

Latest update : June 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 19, 2024

*sanskritdocuments.org*

# વિભીષણહનુમત્સંવાદરૂપવાયુસ્તુતિઃ

કસ્માદસ્મદ્વનસ્યાઙ્ઘ્રિપચયમુદયત્પુચ્છવાનચ્છિનસ્ત્વં
રક્ષો વૃક્ષોગ્રહસ્તઃ સુબહુ કિમવધીઃ કિમ્બલસ્ત્વં બતાદ્ય ।
સિન્ધું ચાન્ધૂકરોષિ પ્રવિશસિ પૃતનાં નિર્ભયો દ્વિડ્ભટાનાં
ચિન્તાસન્તાપકારી દશવદનપુરશ્રીહરઃ કો હરે ત્વમ્ ॥ ૧॥

વાયોરાયોધનાગ્રેસરસુભટશિરશ્ચિત્રરત્નોપમસ્ય
પ્રાયો નાયોધ્યમસ્ય પ્રિયતમસુકુમારોઽહમારોહયોગ્યઃ ।
શ્રીશાક્લેશાઙ્ઘ્રિધામ્નઃ કમલજવસતેશ્ચાહુરાર્યા હનૂમા-
નિત્યાખ્યાં નાત્યયોઽસ્મત્કુલજમુન્નિષુ વો રંહસા વાંઽહસા વા ॥ ૨॥

પારાવારાન્તરોદ્યદ્દ્યુમણિગણસમા ભાતિ યદ્ધામસીમા
ધીરો નારાયણોઽયં રઘુકુલમનઘં કર્તુમુર્વ્યાં વિહર્તુમ્ ।
ભૂમા ભૂમાવુદેત્યાખિલકવિવિનુતો રામનામાસ્તિ ધીમાન્
સોઽયં શ્રીમારુતસ્ય પ્રિયતમતનયં દાસવૃત્યાઽનુશાસ્તિ ॥ ૩॥

રામારામાં દિદૃક્ષોઃ કરચરણચલદ્વાલલીલોરુઘાતૈઃ
જાતક્ષ્માજાતપાતો ન તુ કૃતિરિયમલ્પાતિદર્પસ્ય મેઽલમ્ ।
વેગાદાગચ્છતો મે જવભવપવનસ્યોદયોઽપ્યેનમાસી-
દ્ધન્તાહં તાદૃશો નાસુરજ મમ બલં રાઘવોઽમોઘવીર્યઃ ॥ ૪॥

રામાખ્યામાનિતસ્ય પ્રથિતહરધનુર્ભઙ્ગદોત્તુઙ્ગબાહોઃ
શ્રુત્યન્તાત્યન્તગીતાગણિતગુણગણસ્યેષ્ટસર્વેષ્ટદાતુઃ ।
સોઽહં મોહાન્ધકારક્ષપણદિનમણેર્દાનવાનીકિનીનાં
મૃત્યોર્ભૃત્યોઽસ્મિ તેન પ્રહિત ઇહ ખલાનીતસીતાર્તિશાન્ત્યૈ ॥ ૫॥

પર્યગ્ગિર્યગ્ર્યગણ્યં રવિરથતુરગસ્યાગ્રતો વાઽગ્રયાયી
વિદ્યાં પ્રદ્યોતનાદધ્યગમદુરુજવસ્તન્મુખસ્યોન્મુખો યઃ ।
રામાઙ્ઘ્રિપ્રેમશક્ત્યા ત્રિભુવનજનનસ્થાનસંસ્થાનશક્તે-
ર્લઙ્કા શઙ્કાસ્પદા કિં નિગમનુતચરિત્રસ્ય તસ્યાઽઽશુગસ્ય ॥ ૬॥

અણ્ડોદ્દણ્ડોદશોષેઽપ્યતિકુશલતમઃ ક્ષ્વેદમમ્ભોધિમમ્ભો-
લોકાલોકાપ્તમૂર્તેર્જલનિધિતરણં કિં મહન્નિર્મમસ્ય ।
વિશ્વસ્ય શ્વાસયન્તુર્મમ કિમુ ખલવિધ્વંસને સંશયઃ સ્યા-
દ્દેવાશ્ચૈવોચુરુક્થં મમ પિતરમતશ્ચાસમો દાસ એષઃ ॥ ૭॥

ધર્મં સમ્માનયન્તં રઘુપતિરવતિ પ્રત્યહં શત્રુભાવં
તસ્મિન્યોઽસ્મિન્પ્રદેશે રચયતિ તમિમં હન્તિ તસ્યાનુગસ્ય ।
નિત્યં કૃત્યં તદેવ હ્યઘકરદશકણ્ઠોપકણ્ઠસ્થદૈત્યા-
નિત્થં હત્વાઽઽત્મભર્તુઃ પ્રિયકૃદભવમુદ્દામશૌર્યોર્વ્યવાર્યઃ ॥ ૮॥

દ્રક્ષ્યસ્યક્ષય્યવીર્યોઽપ્યરિભટપટુભિસ્તૈરબદ્ધૈર્હિ બદ્ધઃ
પુચ્છસ્વચ્છાગ્નિનાઽહં કુનયતનયદત્તેન વિત્તં સમસ્તમ્ ।
ધક્ષ્યામ્યધ્યક્ષમેષાં ભવનવનમપિ પ્રાજ્ઞ તે ધામ ધીમન્
ત્યક્ત્વા ત્યક્તોગ્રદૈત્યપ્રકૃતિકૃતવિકારસ્ય ધર્માનુગસ્ય ॥ ૯॥

મુઞ્ચ ત્વં ચાગ્રજસ્ય પ્રબલતમહરિદ્વેષતો દોષભાજઃ
સેનામેનાં વિહીનાં મનસિ સુમનસાં નાયકં દાયકં તે ।
ભાગ્યસ્યાગ્ર્યસ્ય નિત્યં સ્મર દિતિજમતં ધિક્કુરુ ન્યક્કુરુષ્વ
સ્વીયસ્યાઽઽયાસદાત્રીં ધિયમમલધિયા ધારયામું દયાલુમ્ ॥ ૧૦॥

સેતું યાતું કપીનામુરુતરજલધૌ પુણ્યહેતું પ્રહાતું
પાપાન્યાપત્કરાણિ પ્રથિતસુયશસે શર્મ દાતું ચ ગાતુઃ ।
વત્સ્યત્યત્સ્યત્યથાપિ સ્વકરધૃતધનુર્મુક્તશાણોગ્રબાણ-
જ્વાલાજાલઃ સ દૈત્યવ્યવનમવનકૃદ્રાઘવઃ શ્લાઘનીયઃ ॥ ૧૧॥

ભેત્તા મત્તાસુરેન્દ્રપ્રતિભયશિરસાં કુમ્ભકર્ણોગ્રકર્ણ-
ચ્છેત્તા હર્તા ચ તસ્ય પ્રિયતમધરણીભારહારી સ હારી ।
સીતામેતાં સમેત્ય સ્વચરણશરણાન્દેવભૂદેવપૂર્વાન્
પૃથ્વીં ચેત્થં પ્રતોષ્ય પ્રવિશતિ ચ નિજાં શત્ર્વયોધ્યામયોધ્યામ્ ॥ ૧૨॥

તૃષ્ણા કૃષ્ણાવતારેઽપ્યઘશમનતદઙ્ઘ્ર્યબ્જસેવોત્સવે સ્યા-
દ્ભીમો ભૂત્વા તદાઽહં બકમદહરણો હન્મિ કિર્મીરદૈત્યમ્ ।
સત્વોદ્રિક્તં જરાયાઃ સુતમથ ગદયોન્મુદ્ય સદ્ધૈર્યવીર્યઃ
શૌર્યોન્મત્તં ચ દુર્યોધનમનુ સબલં નાશયામ્યાશયાઽન્ધમ્ ॥ ૧૩॥

ઈશાદેશેન સોઽહં પુનરપિ ધરણીં પ્રાપ્ય દુશ્શાસ્ત્રશસ્ત્રં

મધ્વાખ્યોઽદ્ધા પ્રદૂષ્ય પ્રગુણમથ કરિષ્યામિ સૂત્રસ્ય ભાષ્યમ્ ।
કૃત્વા કૃત્વાઽવતારાન્સુરનિકરગુરુર્મુખ્યવાયુર્નિજાયુઃ ।
સાર્થીકર્તું મુકુન્દં પરૈચરતિ સદાઽરીન્હરન્વ્યાહરંશ્ચ ॥ ૧૪॥

વિદ્યાં વિદ્યાપતેર્યઃ પઠૈ હનુમતઃ સોઽપિ વિદ્યાં સમૃદ્ધા-
મભ્યેત્યભ્યુન્નતિં ચ પ્રતિદિનમુરુભક્તિં સ્વયોગ્યં ચ ભાગ્યમ્ ।
વિદ્વન્મધ્યે પ્રસિદ્ધિં બુધનુતકવિતાં વાદિરાજર્ષિરાજઃ
સદ્યો યદ્યોગિવર્યો વ્યતનુત તદિયં સર્વકાર્યાણિ કુર્યાત્ ॥ ૧૫॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતા વિભીષણહનુમત્સંવાદરૂપા
વાયુસ્તુતિઃ સમ્પૂર્ણા ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Jayalakshmi Jayaraman

*VibhishanahanumatsamvAdarupavayustutih*
pdf was typeset on June 19, 2024

Please send corrections to *sanskrit@cheerful.com*